**संस्कृत-वार्ताः**

**दिनाङ्क : 27/12/2025** **सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदेहली-नगरे मुख्यसचिवानाम् पञ्चमं राष्ट्रिय-सम्मेलनस्य अध्यक्षता कृता।
- पश्चिम-बंगाले मतदाता सूच्याः विशेष-अन्वीक्षण-पुनरीक्षण-एसआईआर इत्यस्य वाद-श्रवणस्य प्रथम-चरणमद्य प्रभृति प्रारब्धम्।
- नागरिक-विमानन-महानिदेशालयस्य संयुक्त-महानिदेशकः सञ्जय् के ब्रह्माणे इत्यस्य नेतृत्वे अन्वेषण-समित्याः इण्डिगो-विमान-यानानां परिचालन-बाधायाः विषये स्वीय प्रतिवेदनं समर्पितम्।
- खालसा-पंथ इति सिक्ख-मतस्य संस्थापकस्य श्रीगुरू-गोविन्द-सिंहस्य ऊनषष्ट्युत्तर-त्रिशत-तमीया जयन्ती अद्य हर्षोल्लासेन परिपाल्यते।
- थाईलैण्ड-कम्बोडिया-देशौ विवादास्पद-सीमायां संघर्ष-विरामाय सन्धिपत्रे हस्ताक्षरं कृतवन्तौ।

**अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री**

ह्यः नवदेहली-नगरे मुख्यसचिवानाम् पञ्चमं राष्ट्रिय-सम्मेलनम् आरभत। प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य श्वः च सम्मेलनस्य अध्यक्षता करिष्यते। त्रिदिवसीय-सम्मेलनस्य उद्देश्यं राष्ट्रियप्राथमिकतासु संरचितेन सुस्थिरेण च संवादेन केन्द्र-राज्यसहभागित्वं सुदृढं करणीयम् अस्ति। प्रधानमन्त्रिणः सहकारीसङ्घ-वादस्य दृष्ट्या स्थापितं अयं सम्मेलनं केन्द्र-राज्ययोः सहयोगस्य मञ्चरूपेण कार्यं करोति। सम्मेलने अस्मिन् विकसित-भारताय-मानव सम्पति इत्यस्मिन् विषये ध्यानं अवदास्यति।

**प्रधानमन्त्री मन की बात**

प्रधानमन्त्री नरेन्द्र-मोदी श्वः प्रातः एकादशवादने आकाशवाणीतः ‘मन की बात’ इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् ऊन-विंशत्यधिकैकशततमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि कार्यक्रमः आकाशवाणी-वार्ता विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रीकार्यालय-सूचनाप्रसारण-

कार्यालयानां यू-ट्यूब वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति। हिन्दी-भाषायाः प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्या: क्षेत्रीयासु भाषासु अपि भविष्यति।

**पश्चिम बंगाल-एसआईआर**

पश्चिम-बंगाले मतदाता सूच्या: विशेष-अन्वीक्षण-पुनरीक्षण-एसआईआर इत्यस्य वाद-श्रवणस्य प्रथम-चरणमद्य प्रभृति प्रारब्धम्। अशेषे राज्ये त्रि-सहस्राधिक-चतुश्त्रिंशदुत्तर- द्विशत-वाद-श्रवण-केन्द्राणि संस्थापितानि सन्ति। प्रथमे चरणे द्वा-त्रिंशल्लक्षं यावत् मतदातारः वाद श्रवणार्थं समाहूता:, एतेषां मतदातृणां नामानि द्वयधिक-द्वि सहस्र-तमाब्दस्य मतदातृ-सूच्याः भिन्नानि सन्ति। मतदातृणां आधार-प्रपत्रं समेत्य द्वादश-वैध-प्रपत्राणि अवश्यमेव पञ्जीकृतानि भवेयु: । निर्वाचन-आयोगेन स्पष्टतया निर्दिष्टं यत् अवैध-प्रपत्राणां पञ्जीकरणं दण्डनीय-अपराधो भविष्यति। राज्यस्य मुख्य निर्वाचनाधिकारिणा मनोज-कुमार-अग्रवालेन भणितं यत् वादश्रवणस्य सर्वविध-सज्जता प्रपूरिता । वाद-श्रवणावधौ सार्ध-चतुस्सहस्राधिक-पर्यवेक्षका: नियोजयिष्यन्ते ।

**डीजीसीए**

नागरिक-विमानन-महानिदेशालयस्य संयुक्त-महानिदेशकः सञ्जय् के ब्रह्माणे इत्यस्य नेतृत्वे अन्वेषण-समित्याः इण्डिगो-विमान-यानानां परिचालन-बाधायाः विषये स्वीय प्रतिवेदनं समर्पितम्। अस्मिन् मासे पञ्चमे दिनाङ्के सम्पूर्णे देशे जाते विमान सेवासु समाह्वानानां समग्रसमीक्षां मूल्याङ्कनं च कर्तुं समित्याः गठनं जातम्। समित्या ह्यः सायङ्काले प्रतिवेदनं समर्पितम्।

**विराम**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

**गुरूगोविन्द सिंह जयन्ती**

खालसा-पंथ इति सिक्ख-मतस्य संस्थापकस्य श्रीगुरू-गोविन्द-सिंहस्य ऊनषष्ट्युत्तर-त्रिशत-तमीया जयन्ती अद्य पटना-साहिब-इत्यस्य तख्त-श्रीहरमिन्दर-साहिब, अमृतसरं समेत्य अशेषे हि पञ्जाब-राज्ये, देशस्य अनेकेषु भागेषु च अद्य हर्षोल्लासेन परिपाल्यते । अवसरे अस्मिन् गुरूगोविन्दसिंहस्य मातु:, तस्य साहिबजादानां च बलिदानं स्मार्यते।

**राष्ट्रपति- श्रीगुरुगोविन्दसिङ्ह**

राष्ट्रपतिः द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्र मोदी च अद्य दशमान्तिमस्य च सिक्ख-गुरोः श्रीगुरुगोविन्दसिङ्घस्य पवित्र-प्रकाशोत्सवस्य उपलक्ष्ये शुभाशयाः प्रदत्तवन्तौ। सामाजिक-अन्तर्जालीय सन्देशे राष्ट्रपतिः अवदत् यत्, श्रीगुरुगोविन्दसिङ्घ्-वर्येण स्वीय अदम्य-साहसेन, दुर्लभ-दूरदृष्ट्या च जनान् न्यायेन जीवितुं प्रेरितम्। प्रधानमन्त्री श्रीमोदी अस्य वर्षस्य आरम्भे सिक्ख-मतानुयायिनां पवित्रतम-तीर्थस्थानेषु अन्यतमस्य श्रीगुरुगोविन्दसिङ्घ्-वर्यस्य जन्मस्थाने च तखत-श्री-हर-मन्दिर-जी-पटना-साहिब-इत्यस्य भ्रमणस्य छायाचित्राणि प्रसारितवान्। श्रीगुरुगोविन्दसिङ्घः अद्यापि शौर्यस्य, अनुकम्पायाः, त्यागस्य च मूर्तरूपः अस्ति इति श्रीमोदी उक्तवान्।

**राष्ट्रपति-यात्रा**

राष्ट्रपतिः द्रौपदी मुर्मुः अद्यारभ्य गोवा, कर्नाटक, झारखण्ड इत्येतेषु प्रदेशेषु चतुर्दिवसीय यात्रायां भविष्यति। अद्य सायङ्काले राष्ट्रपतिः गोवा-नगरं गमिष्यति। श्वः श्रीमतिमुर्मुः कर्णाटकस्य कारवार-हार्बर नौकाश्रयात् जलान्तर्गामिना सम्बरीन माध्यमेन समुद्रीय-यात्रां करिष्यति। सोमवासरे राष्ट्रपतिः झारखण्ड-राज्यस्य जमशेदपुर-नगरे ओल्-चिकी-लिप्याः शतवार्षिक-उत्सवे भागं भजिष्यति। ओल्-चिकी-लिपिः पञ्च-विंशत्यधिक-ऊनविंशति-शत-तमे वर्षे रघुनाथ-मुर्मु इत्यनेन सन्थालि-भाषायाः कृते निर्मिता आसीत्। ओल्-चिकी इतीदं सन्थाल-आदिवासि-समुदायस्य कृते बृहत्-सांस्कृतिकं भाषिकं च महत्वं धारयति, तथा च तेषां परिचयस्य, साहित्यस्य, परम्परायाः च संरक्षणे महत्वपूर्णां भूमिकां निभालयति।

**दिल्ली आरक्ष्िादलम् ऑपरेशन आघात**

दिल्ली आरक्षि बलेन ऑपरेशन-आघात- इति अभियानस्य तृतीय संस्करणस्य अन्तर्गतं अशीत्यधिक-द्विशताधिक आरोपिणः धृताः। शस्त्र-अधिनियम-स्वापक-औषध-मनः प्रभावि-पदार्थ-अधिनियम-एतादृशानां अधिनियमानाम् अन्तर्गतं एते आरोपिणः निगडिताः । दिल्ली आरिक्ष-बलेन सूचितं यत् चतुरधिक-पञ्चशताधिकाः जनाः साम्प्रतं यावत् धृताः जाताः ।

**उपभोक्ता-विभागः**

उपभोक्तृकार्यविभागस्य प्रमुखः उपक्रमः राष्ट्रिय-उपभोक्तृ-सहायिका-सेवा, एकत्रिंशत् क्षेत्रेषु पञ्चचत्वारिंशत् कोटि-रूप्यकाणां प्रतिदानस्य सुविधा प्रदत्ताऽस्ति। उपभोक्तृकार्यस्य, खाद्यस्य तथा सार्वजनिकवितरणस्य मन्त्रालयेन सूचितं यत् गत अष्टमासेषु सप्तषष्ठि सहस्रतोप्यधिकाः उपभोक्तृणां समाह्वानानां अनेन उपक्रमेण समाधानम् अभवत् ।

**यू.एस. वैज्ञानिक-सेवाबाधिताः**

संयुक्त-राष्ट्र-अमरीकायां भीषण-शीत-झञ्झावात-प्रकोपकारणात् सहस्राधिकाः वैमानिक-सेवा-बाधिताः । तत्र शीतलहर्य्याः कारणेन षडशतोत्तरैक-सहस्राधिक-विमानानि निरस्ती-भूतानि, चतुश्शताधिक-सप्तसहस्राणि यावत् च विलम्बेन प्रचलन्ति। तत्र न्यूयॉर्के हिमपातस्य सम्भावना अपि प्रकाशितास्ति। तत्रत्य ऋतु-विभाग-अधिकारिणः पर्यटकान् प्रति संचेतना अपि प्रसारिता। न्यूयॉर्क-नगरे वर्षेऽस्मिन् हिमपात-आपद्स्थितेः सूचना अपि घोषितास्ति।

**थाइलैंड-कम्बोडिया**

थाईलैण्ड-कम्बोडिया-देशौ विवादास्पद-सीमायां संघर्ष-विरामाय सन्धिपत्रे हस्ताक्षरं कृतवन्तौ। थाईलैण्ड-देशस्य रक्षामन्त्रिणा नत्था-पोन नाक-पानिच इत्यनेन, कम्बोडिया-देशस्य उपप्रधानमन्त्रिणा रक्षामन्त्रिणा च टी सेईहा इत्यनेन च अद्य थाईलैण्ड-देशस्य चन्तबुरी-प्रान्तस्य सीमा-निरीक्षणस्थाने सन्धिपत्रे हस्ताक्षरं कृतम्। सीमा-समित्याः विशिष्ट-उपवेशने उभौ देशौ संयुक्त-वक्तव्ये सहमतौ।

**संस्कृत - साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः श्वः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

।। इति वार्ताः ।।